**आकाशवाणी**

**दिनाङ्क: - 28.11.2024** **सायम् - 06:20**

**मुख्यवार्ता:**

- विपक्षदलै: कृतकोलाहल-कारणेन संसद: उभयो: सदनयो: कार्याचरणानि श्व: यावत् स्थगितानि।
- राष्ट्रपति: द्रौपदी मुर्मु: ख्यापितवती यत् नवाचारेण आत्मनिर्भरतया च प्रेरितया भारतदेशस्य रक्षा-क्षमतया विश्वस्य ध्यानं स्वं प्रति आकृष्टम्।
- रांचीनगरे झारखण्ड-मुक्ति-मोर्चा-दलस्य नेता हेमन्त-सोरेन: अद्य चतुर्थवारं मुख्यमन्त्रिपदाय शपथवचनं स्वीकृतवान्।
- पञ्चपञ्चाशत्तम: भारत-अन्ताराष्ट्रिय-चलच्चित्रमहोत्सव: अद्य गोवायां सम्पन्नतां प्राप्नोति।
- भारतीया पैराएथलीट-क्रीडिका रिनचेन-यूडोल: बहरीननगरे आयोजितायां प्रथमायां विश्व-पैरा-पूमसे-ताइक्वांडो-चौम्पियनशिप-प्रतिस्पर्धायां कांस्यपदकं विजित्य ऐतिह्यं विरचितवती।

**संसद्-स्थगनम्**

विपक्षदलै: कृतकोलाहल-कारणेन संसद: उभयो: सदनयो: कार्याचरणानि श्व: यावत् स्थगितानि। अद्य प्रात: यदा लोकसभायां कार्याचरणं समारब्धं तदा कांग्रेस-समाजवादीपार्टी-डीएमके इत्येतेषां विपक्षिदलानां नेतार: प्रमुखं व्यवसायि-समूहं विरुध्य उत्कोचस्य आरोपान् समेत्य अनेकेषु प्रसङ्गेषु कोलाहलं कृतवन्त:। प्रथमस्थगनस्य आनन्तर्यं यावत् द्वादश वादने राज्यसभाया: कार्याचरणं समारभत तावत् विपक्षिदलानां भृशं कोलाहलं सदनमध्ये प्रचलितम्। राज्यसभाया: सभापति: जगदीप-धनखड़: विपक्षि-सदस्यै: स्व-स्व-स्थानं प्रत्यागमनाय आग्रहं कृतवान् उक्तवान् च यत् सदनमिदं सार्थक-चर्चायै मञ्चत्वेन कार्यं करोतीति। संसदीय-कार्यमन्त्री किरेन-रिजिजू: विपक्षदलै: कृतव्यवहारस्य निन्दां कृतवान्। प्रोक्तवान् च यत् कांग्रेसदलस्य अन्येषाञ्च दलानां सदस्या: व्यर्थत्वेन कोलाहलस्य प्रयासं कुर्वन्ति येन हि नवीना: सदस्या: अपि स्वविषयस्थापनाय समर्था: नैव भवन्तीति।

अत्रावधौ, चतुर्विंशत्यधिक-द्विसहस्रतमवर्षस्य वक्फ-संशोधन-विधेयके संयुक्त-संसदीय-समित्या: अध्यक्ष: जगदम्बिका-पाल: समित्या: प्रतिवेदनं प्रस्तोतुं समयं वर्धयित्वा आय-व्यय-प्रपत्र-सत्रस्य अन्तिमं दिनं यावत् स्थापयितुं प्रस्तावं स्थापितवान्। इत: प्राक् साम्प्रतिके एव समये उपनिर्वाचने विजयप्राप्तकर्त्री प्रियङ्का गांधी वाड्रा इत्येषा रवीन्द्र-वसन्तराव चव्हाण: च लोकसभायां सांसदरूपेण शपथवचनं स्वीकृतवन्तौ।

**राष्ट्रपति:**

राष्ट्रपति: पदासीना: द्रौपदीमुर्मु: ख्यापितवती यत् नवाचारेण आत्मनिर्भरतया च प्रेरितया भारतदेशस्य रक्षा-क्षमतया विश्वस्य ध्यानं स्वं प्रति आकृष्टम्। तमिलनाडो: वेलिंग्टन-ऊटी-इत्यत्र डिफेंस-सर्विसेज-स्टाफ-ट्रेनिंग-इत्यस्मिन् महाविद्यालये आयोजितं एकं समारोहं सम्बोधयन्ती राष्ट्रपति: न्यगादीत् यत् रक्षाबलेषु महिलानां सहभागिता देशाय गौरववहा विषयो विद्यते। विश्वस्य बृहत्तमस्य उच्चस्थानस्य सियाचिन युद्ध क्षेत्रस्य साम्प्रतिके एव समये सम्पन्नां यात्रां स्मरन्त्या अनया निगदितं यत् महिलासैनिका: काठिन्य-परिस्थितिषु अपि प्रबलतया स्थिता: वर्तन्ते। अत्रावसरे राष्ट्रपति: विभिन्नेभ्य: देशेभ्य: विशिष्ट-पाठ्यक्रमे भागं स्वीकुरुतां महिलाधिकारिणां प्रशंसामपि कृतवती। राष्ट्रपति: अत्रावधौ देशस्य रक्षणार्थं सैनिकानां परिवारान् अपि प्रशंसितवती। कार्यक्रमात् अस्मात् पूर्वं राष्ट्रपति: महाविद्यालये प्रतिष्ठिते स्मारके पुष्पाञ्जलिं समर्पितवती। श्व: आदिवासिसमुदायै: सह वार्तां करिष्यति इति ।

**हेमन्त-शपथवचनं**

झारखण्ड-मुक्ति-मोर्चा-दलस्य नेता हेमन्त-सोरेन: अद्य चतुर्थवारं मुख्यमन्त्रिपदाय शपथवचनं स्वीकृतवान्। अवधेयं वर्तते यत् सञ्जाते झारखण्ड विधानसभानिर्वाचने झारखण्ड-मुक्ति-मोर्चा-युतया इण्डिया-संयुत्या एकाशीति-विधानसभासनेषु षड्पञ्चाशत्

आसनानि विजितानि। राज्यपाल: सन्तोष-कुमार-गंगवार: रांचीनगरे आयोजिते शपथग्रहणसमारोहे हेमन्तसोरेनाय तस्य च मन्त्रिमण्डलाय शपथवचनं प्रदत्तवान्।

**नीति-आयोग:**

नीत्यायोगस्य सदस्यः डा. वी. के. सारस्वतः केन्द्रप्रशासनस्य पञ्चामृत-लक्ष्याणां विषये अवधानं दत्वा उक्तवान् यत् एतेषां लक्ष्याणां प्राप्त्यर्थं प्रशासनम् पूर्णतया प्रतिबद्धमस्ति इति। अयं अद्य नवदेहली-नगरे 'शेपिङ्ग् फ्रेम्वर्क्स्, टेक्नालजी, एण्ड् स्ट्रेटेजिक् पार्टनर्शिप्स्' इति विषयस्य अन्तर्गतं ऊर्जा-सञ्चय-सम्मेलनस्य उद्घाटन-सत्रं सम्बोधयन् आसीत्। श्रीसारस्वतः अवदत् यत्, ऊर्जा-प्रसारणे परमाणु-ऊर्जा महत्त्वपूर्णां भूमिकां निर्वहति इति। श्रीसारस्वतः इत्यपि अवदत् यत् पुनर्नवीकरणीय-ऊर्जा-संस्थापित-क्षमतायां भारतं वैश्विकरूपेण चतुर्थं, वायु-ऊर्जा-क्षमतायां चतुर्थं, सौर-ऊर्जा-क्षमतायां पञ्चमं च स्थानम् भजते। ऊर्जा-सञ्चय-सम्मेलने नीतिनिर्मातारः, उद्योग-प्रमुखाः, प्रौद्योगिकी-आविष्कर्तारः ऊर्जा-सञ्चय-क्षेत्रस्य प्रमुख-हितधारका: च सहभागितां स्वीकरिष्यन्ति इति अस्माकं संवाददाता सूचितवान् ।

**राज्यसभा-जयशङ्कर:**

भारतं संयुक्त-राष्ट्र-सुरक्षा-परिषद: विस्तारार्थं संयुक्तराष्ट्रस्य सदस्य- राष्ट्राणां मध्ये समर्थनं निर्मातुम् अन्यै: परिष्कारोन्मुखै: राष्ट्रै: सह मिलित्वा कार्यं कुर्वदस्ति यतो हि नवदिल्ल्या: समीपे संयुक्तराष्ट्रस्य सुरक्षापरिषद: स्थायिसदस्यं भवितुं सर्वाणि प्रमाणानि सन्ति यानि समकालिकीं वैश्विक-सत्यतां प्रदर्शयन्ति इति। विदेशमन्त्री डॉ. एस. जयशङ्कर: अद्य राज्यसभायां एकस्मिन् लिखितोत्तरे एतां वार्तां कथितवान्। असौ अकथयत् यत् प्रशासनं विस्तृतायां संयुक्तराष्ट्र-सुरक्षा-परिषदि स्थायिसदस्यतां प्राप्तुं सर्वोच्च प्राथमिकतां प्रददाति इति। असौ सबलं कथितवान् यत् भारतं द्विपक्षीय-बहुपक्षीय-स्तरयो: अथ च संयुक्तराष्ट्रसुरक्षा-परिषद: संशोधने प्रचल्यमानासु चर्चासु सम्मिलितमस्ति।

**इफ्फी-महोत्सव:**

पञ्चपञ्चाशतम: भारत-अन्ताराष्ट्रिय-चलच्चित्रमहोत्सव: अद्य गोवायां सम्पन्नतां प्राप्तनोति। एतस्मिन् समापनसमारोहे भारतीय-चलच्चित्र-जगत: अनेके प्रतिष्ठिता: कलाकारा: सम्मिलिता: भवन्ति। अत्रावसरे सुविख्यातं गोल्डन-पिकॉक-पुरस्कारं समेत्य नैके पुरस्कारा: प्रदास्यन्ते। पुरस्काराणां प्रतिस्पर्धायां भारतस्य त्रीणि चलच्चित्राणि समेत्य पञ्चदश चलच्चित्राणि समाविष्टानि। नवदिवसात्मके एतस्मिन् चलच्चित्रमहोत्सवे विविधा: सांस्कृतिक-सङ्गीत-कार्यकमा: आयोजिता:। नाना-भाषाणां शैलीनाम् आहत्य एकाशीत्यैककशतं चलचित्राणि प्रदर्शितानि।

**बैडमिण्टन प्रतिस्पर्धा**

भारतस्य पी.वी. सिन्धु: मीराबा लुवाङ्ग मैसनाम: आयुषशेट्टी च लखनऊनगरे सैयदमोदी अन्ताराष्ट्रिय-बैडमिण्टन-प्रतियोगिताया: एकल-प्रतिस्पर्धानां प्रागुपान्त्यचक्रे समाविष्टवन्त:।

**करगिल-पैराएथलीट**

केन्द्रशासित-प्रदेशस्य लद्दाखस्य करगिलस्थानस्य भारतीया पैराएथलीट-क्रीडिका रिनचेन-यूडोल: बहरीननगरस्य मनामा'याम् आयोजितायां प्रथमायां विश्व-पैरा-पूमसे-ताइक्वांडो-चैम्पियनशिप-प्रतिस्पर्धायां कांस्यपदकं विजित्य ऐतिह्यं विरचितवती।

**संस्कृत-साप्ताहिकी**

प्रिया: श्रोतार:, संस्कृतजगता सम्बद्धै: विभिन्नै: क्रियाकलापै: संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्या: एफ.एम.गोल्ड-प्रवाहिकात: प्रत्येकस्मिन् रविवासरे मध्याह्ने सार्धैक-वादनत:भविष्यति।

**।।इति वार्ता:।।**